तल्लेखकपूजाफलं यथा,—
"आरम्भे च समाप्तौ च लेखकं प्रतिपूजयेत्।
हरिञ्च गन्धपुष्पाद्यैर्वस्त्रैश्च सुमनोहरैः॥
यावदक्षरसंख्यानं प्रतिपत्रे च सुन्दरि!।
तावद्युगसहस्राणि ब्रह्मलोके वसेच्चिरम्॥"
वेतनग्रहणे लेखकस्य दोषो यथा,—
"वेतनं यस्तु गृह्णीयात् लिखित्वा पुस्तकं स तु।
यावदक्षरसंख्यानं तावच्च नरके वसेत्॥"
भूमौ पुस्तकलेखनस्थापननिषेधो यथा,—
"न भूमौ विलिखेद्वर्णं मन्त्रं न पुस्तकं लिखेत्।
न शुक्रा पुस्तकं स्थाप्यं न शुक्रमाहरेत्तु तत्॥
भूकम्पग्रहणे चैव अक्षरं वाथ पुस्तकम्।
भूमौ तिष्ठति देवेशि! जन्मजन्मसु मूर्खता।
तदा भवति देवेशि! तस्मात्तत् परिवर्ज्जयेत्॥"
इति योगिनीतन्त्रे तृतीयभागे सप्तमपटलः॥*॥
तस्य दानफलं यथा,—
विप्राय पुस्तकं दत्त्वा धर्म्मशास्त्रस्य च द्विज!।
पुराणस्य च यो दद्यात् स देवत्वमवाप्नुयात्॥
शास्त्रदृष्ट्या जगत् सर्व्वं सुश्रुतञ्च शुभाशुभम्।
तस्मात् शास्त्रं प्रयत्नेन दद्याद्विप्राय कार्त्तिके॥
वेदविद्याञ्च यो दद्यात् स्वर्गे कल्पत्रयं वसेत्।
आत्मविद्याञ्च यो दद्यात्तस्य संख्या न विद्यते॥
त्रीणि तुल्यप्रदानानि त्रीणि तुल्यफलानि च।
शास्त्रं कामदुघा धेनुः पृथिवी चैव शाश्वती॥"
इति पाद्मोत्तरखण्डे ११७ अध्यायः॥*॥
वेदशास्त्रादिदानफलं यथा,—
"वेदार्थयज्ञशास्त्राणि धर्म्मशास्त्राणि चैव हि।
मूल्येन लेखयित्वा यो दद्याद्याति स वैदिकम्॥
इतिहासपुराणानि लिखित्वा यः प्रयच्छति।
ब्रह्मदानसमं पुण्यं प्राप्नोति द्विगुणीकृतम्॥"
इति गारुड़े २१५ अध्यायः॥*॥
भागवतदानविधानं तु पारायणशब्दे द्रष्टव्यम्॥
पुस्तकर्म्मा, त्रि, (पुस्तं लिखनादिकं कर्म्म यस्य।) लेप्यादिशिल्पकर्म्मकर्त्ता। इति हलायुधः॥
पू, ङ शोधे। इति कविकल्पद्रुमः॥ (भ्वा०-आत्म०-सक०-सेट्।) शोध इह शुद्धीकरणम्। ङ, पवते पावनं गङ्गा। इति दुर्गादासः॥
पू, ङ य शोधे। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-सक०-सेट्।) अयं कैश्चिन्न मन्यते। ङ य, पूयते। इति दुर्गादासः॥
पू, ञ गि शोधे। इति कविकल्पद्रुमः॥ (क्र्या०-प्वा०-उभ०-सक०-सेट्।) ञ गि, जाह्नवी नः पुनातु। पुनीते। क्वचित् श्नाप्रत्ययस्यापि प्वादित्वात् ह्रस्व इति वररुचिः। तेन।
"स्मरणात् पुनते पापं धारणात् पूर्व्वसञ्चितम्।
दर्शनाल्लभते मोक्षमेतद्योगस्य लक्षणम्॥"
इति दुर्गादासः॥
पूगं, क्ली, (पूयते सुखमनेनेति। पू ञ पवने + "छापूखडिभ्यः कित्।" उणा०।१।१२३। इति गन् किच्च।) गुवाकफलम्। इत्यमर-टीकायां रायमुकुटः॥ (यथा, भविष्यपुराणे। तालनवमीव्रतकथायाम्।
"पिण्डखर्ज्जूरं जातिञ्च एला चैव हरीतकी।
नारिकेलं तथा पूगं रम्भापक्वफलन्तथा।
तत्र मुख्यं प्रदातव्यं तालस्य फलमुत्तमम्॥")
पूगः, पुं, (पूयतेऽनेनेति। पूञ् + "छापूखडिभ्यः कित्।" उणा०।१।१२३। इति गन्। स च कित्।) गुवाकः। समूहः। इत्यमरः॥ (यथा, महाभारते।६।२१।१४।
"अनन्ततेजा गोविन्दः शत्रुपूगेषु निर्व्यथः।
पुरुषः सनातनतमो यतः कृष्णस्ततो जयः॥")
छन्दः। भावः। कण्टकिवृक्षः। इति शब्द-रत्नावली॥
पूगपात्रं, क्ली, (पूगस्य दन्तचर्व्वितपूगरसस्य आधारभूतं पात्रम्।) पूगपीटम्। पिकदानी। इति भाषा। तत्पर्य्यायः। फरुवकम् २। इति हारावली॥
पूगपीठं, क्ली, (पूगस्य दन्तचर्व्वितपूगरसस्य पीठमाधारपात्रम्।) पूगपात्रम्। तत्पर्य्यायः। कटकोलः २ पतद्ग्रहः ३। इति त्रिकाण्ड-शेषः॥
पूगपुष्पिका, स्त्री, (पूगसहितं पुष्पमत्रेति। पूग-पुष्प + कप्। कापि अत इत्वम्।) विवाह-सम्बन्धिपुष्पताम्बूलम्। तत्पर्य्यायः। कुहलिः २। इति त्रिकाण्डशेषः॥
पूगफलं, क्ली, (पूगस्य गुवाकस्य फलम्।) गुवा-कफलम्। तत्पर्य्यायः। पूगम् २ चिक्कणी ३ चिक्का ४ चिक्कणम् ५ सोण्ठकम् ६ उद्वेगम् ७ क्रमुकफलम् ८। इति राजनिर्घण्टः॥ (यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये।
"कषायमीषन्मधुरं किञ्चित् पूगफलं सरम्॥")
पूगरोटः, पुं, (पूगवृक्ष इव रोटयति दीप्यते प्रका-शते इति। रुट् + अच्।) हिन्तालवृक्षः। इति त्रिकाण्डशेषः॥
पूज, क पूजे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) षष्ठस्वरी। क, पूजयति गुरुं लोकः। इति दुर्गादासः॥
पूजकः, त्रि, (पूजयतीति। पूज + ण्वुल्।) पूजा-कर्त्ता। यथा, तिथ्यादितत्त्वे।
"यत्रैव भानुस्तु वियत्युदेति
प्राचीति तां वेदविदो वदन्ति।
तथा पुरः पूजकपूज्ययोश्च
तदागमज्ञाः प्रवदन्ति तान्तु॥"
पूजनं, क्ली, (पूज + भावे ल्युट्।) पूजा। अर्च्च-नम्। यथा,—
"क्रुद्धेन न च कर्त्तव्यं लोभेन त्वरया न च।
मत्पूजनं विधानेन यदीच्छेत् परमां गतिम्॥"
इति वराहपुराणम्॥
पूजनी, स्त्री, (पूज्यते इति। पूज + कर्म्मणि ल्युट्। ङीप्।) चटका। इति भरतः॥ (ब्रह्मदत्तगृह-स्थितशकुनिविहङ्गमस्त्रीविशेषः। यथा, महा-भारते।१२।१३९।४—१०।
"शृणुष्व राजन्! यद्वृत्तं ब्रह्मदत्तनिवेशने।
पूजन्या सह संवादं ब्रह्मदत्तस्य भूपतेः॥
काम्पिल्ये ब्रह्मदत्तस्य अन्तःपुरनिवासिनी।
पूजनी नाम शकुनिर्दीर्घकालं सहोषिता॥
रुतज्ञा सर्व्वभूतानां यथा वै जीवजीवकः।
सर्व्वज्ञा सर्व्वतत्त्वज्ञा तिर्य्यग्योनिं गतापि सा॥
अभिप्रजाता सा तत्र पुत्त्रमेकं सुवर्च्चसम्।
समकालञ्च राज्ञोऽपि देव्यां पुत्त्रो व्यजायत॥
तयोरर्थे कृतज्ञा सा खेचरी पूजनी सदा।
समुद्रतीरं सा गत्वा आजहार फलद्वयम्॥
पुष्ट्यर्थञ्च स्वपुत्त्रस्य राजपुत्त्रस्य चैव ह॥
फलमेकं सुतायादाद्राजपुत्त्राय चापरम्।
अमृतास्वादसदृशं बलतेजोऽभिवर्द्धनम्॥
आदायादाय सैवाशु तयोः प्रादात् पुनःपुनः।
ततोऽगच्छत् परां वृद्धिं राजपुत्त्रः फला-शनात्॥"
इत्यादि तत्रैवाध्याये विस्तरशो द्रष्टव्यम्॥)
पूजा, स्त्री, (पूजनमिति। पूज + "चिन्तिपूजि-कथिकुम्बिचर्च्चश्च।" ३।३।१०५। इति अङ्। ततष्टाप्।) पूजनम्। तत्पर्य्यायः। नमस्या २ अपचितिः ३ सपर्य्या ४ अर्च्चा ५ अर्हणा ६। इत्यमरः।२।७।३५॥ नुतिः ७। इति शब्दरत्नावली॥ (यथा, रामायणे।२।५२।५।
"अपि रामे महाभागा मम माता यशस्विनी।
वन्यैरुपाहरत् पूजां पूजार्हे सर्व्वदेहिनाम्॥")
तस्याः सामान्यानुष्ठानं यथा,—
"आदावृष्यादिकन्यासः करशुद्धिस्ततः परम्।
अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च॥
तालत्रयञ्च दिग्बन्धः प्राणायामस्ततः परम्।
ध्यानं पूजा जपश्चैव सर्व्वतन्त्रेष्वयं विधिः॥"
इति तन्त्रसारे यामलः॥
शक्तिविषये चतुःषष्टिरुपचारा यथा,—
आसनारोपणम् १ सुगन्धितैलाभ्यङ्गः २ मज्जन-शालाप्रवेशनम् ३ मज्जनमणिपीठोपवेशनम् ४ दिव्यस्नानीयम् ५ उद्वर्त्तनम् ६ उष्णोदक-स्नानम् ७ कनककलसस्थितसकलतीर्थाभिषेकः ८ धौतवस्त्रपरिमार्ज्जनम् ९ अरुणदुकूलपरि-धानम् १० अरुणदुकूलोत्तरीयम् ११ आलेप-मण्डपप्रवेशनम् १२ आलेपमणिपीठोपवेशनम् १३ चन्दनागुरुकुङ्कुमकर्पूरकस्तूरीरोचनादिव्य-गन्धसर्व्वाङ्गानुलेपनम् १४ केशभारस्य काला-गुरुधूपमल्लिकामालतीजातीचम्पकाशोकशत-पत्रपूगकुहरीपुन्नागकह्लारयूथीसर्व्वर्त्तुकुसुम-मालाभूषणम् १५ भूषणमण्डपप्रवेशनम् १६ भूषण-मणिपीठोपवेशनम् १७ नवमणिमुकुटम् १८ चन्द्रशकलम् १९ सीमन्तसिन्दूरम् २० तिलक-रत्नम् २१ कालाञ्जनम् २२ कर्णपालीयुगलम् २३ नासाभरणम् २४ अधरयावकः २५ ग्रथन-भूषणम् २६ कनकचित्रपदकम् २७ महापदकम् २८ मुक्तावलिः २९ एकावलिः ३० देवच्छन्दकः ३१ केयूरयुगलचतुष्टयम् ३२ वलयावलिः ३३ ऊर्म्मिकावलिः ३४ काञ्चीदाम ३५ कटिसूत्रम् ३६ शोभाख्याभरणम् ३७ पादकटकम् ३८ रत्ननूपुरम् ३९ पादाङ्गुरीयकम् ४० एककरे